## सप्तमः पाठः

# संहतिः कार्यसाधिका

### तृतीया प्रामुख्यम्

शरीरेण एकताबोधः भवति। शरीरे विभिन्नानि अङ्गानि भवन्ति। अङ्गानां मेलनेन शरीरनिर्माणं भवति। अङ्गानां सहयोगेन एव शरीरं सर्वाणि कार्याणि करोति।

वयं नेत्राभ्यां पश्यामः। कर्णाभ्यां शृणुमः। नासिकया जिघ्रामः। जिह्वया स्वादयामः। पादाभ्यां चलामः। हस्ताभ्यां कार्यं कुर्मः। दन्तैः अन्नचर्वणं कुर्मः। मुखेन खादामः, पिबामः वदामः च। एवम् अङ्गानां सहयोगेन एव शरीरेण सर्वाः क्रियाः भवन्ति।

अल्पानाम् अपि वस्तूनां सहयोगेन वयं दीर्घाणि कार्याणि कुर्मः। तृणानां मेलनेन रज्जुनिर्माणं भवति। रज्जुना शय्यानिर्माणं भवति। तेन एव कूपात् घटेन जलं प्राप्नुमः। रज्जुना बलशाली गजः अपि बध्यते। पुष्पैः मालायाः निर्माणं भवति। मालाभिश्च देवानां पूजनं वयं कुर्मः। महत् कार्याणि बहुभिः जनैः एव पूर्णानि भवन्ति, न तु एकेन जनेन।

बहुभिः क्रीडकैः एव क्रीडनं भवति। विभिन्नैः मुद्रितपत्रैः पुस्तकनिर्माणं भवति। पर्णैः, पुष्पैः, फलैः, शाखाभिः च वृक्षः शोभते। तन्तुभिः वस्त्रनिर्माणं भवति। पञ्चभिः अङ्गुलीभिः मुष्टिः भवति। बहूनाम् अराणां सहयोगेन चक्रनिर्माणं भवति। एकया एकया इष्टिकया गृहनिर्माणं भवति। एकेन एकेन बिन्दुना घटः पूर्णः भवति। तदा वयं जलं पिबामः। उक्तञ्च –

''जलबिन्दुनिपातेन क्रमशः पूर्यते घटः''

अतः संहतिः एव कार्यसाधिका भवति। अनेकतायाम् एकता अस्माकं भारतदेशस्य गौरवसूत्रम् अपि अस्ति। उक्तम् –

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः।।

### शब्दार्थाः

संहतिः = एकता

कार्यसाधिका = कार्य को सिद्ध करने वाली

रज्जुना = रस्सी के द्वारा

घटः = घड़ा

इष्टिकया = ईंट से

जिह्वया = जीभ से

गजः = हाथी

मुद्रितपत्रैः = लिखित पन्नों द्वारा

अराणाम् = तीलियों के

मुष्टिः = मुट्ठी

## अभ्यासः

१. एकपदेन उत्तरं लिखत -

(क) वयं नेत्राभ्यां किं कुर्मः?

(ख) तृणानां मेलनेन किं भवति?

(ग) केन बलशाली गजः बध्यते?

(घ) कैः वस्त्रनिर्माणं भवति?

(ङ) घटः केन पूर्णः भवति?

(च) का कार्यसाधिका भवति?

२. उचितं मेलयत –

| | (अ) | (ब) |
|---|---|---|
| (क) | रज्जुना | खादामः |
| (ख) | नेत्राभ्यां | चलामः |
| (ग) | हस्ताभ्यां | गजः बध्यते |
| (घ) | तृणानां मेलनेन | मुष्टिः |
| (ङ) | पादाभ्यां | रज्जुनिर्माणम् |
| (च) | मुखेन | कार्यं कुर्मः |
| (छ) | अङ्गुलीभिः | पश्यामः |

3. निम्नलिखितशब्दानां तृतीयाविभक्तेः रूपाणि लिखत –

| शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- हस्त | हस्तेन | हस्ताभ्याम् | हस्तैः |
| (क) पाद | ............... | ............... | ............... |
| (ख) घट | ............... | ............... | ............... |
| (ग) अर | ............... | ............... | ............... |
| यथा- नासिका | नासिकया | नासिकाभ्याम् | नासिकाभिः |
| (क) जिह्वा | ............... | ............... | ............... |
| (ख) इष्टिका | ............... | ............... | ............... |
| (ग) शाखा | ............... | ............... | ............... |

| यथा- पुष्प | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
|---|---|---|---|
| (क) शरीर | ............... | ............... | ............... |
| (ख) चक्र | ............... | ............... | ............... |
| (ग) चित्र | ............... | ............... | ............... |

४. निम्नलिखितैः शब्दैः वाक्यानि रचयत –

(क) हस्तेन (ख) पादाभ्यां (ग) नासिकया
(घ) मालाभिः (ङ) संहतिः

५. उचितशब्दैः रिक्तस्थानानि पूरयत –

(क) कार्यसाधनाय ................... श्रेष्ठा। (भिन्नता/संहतिः)

(ख) मालायाः निर्माणं .............. भवति। (पुष्पैः/पुष्पाय)

(ग) वयं नेत्राभ्यां ..............। (शृणुमः/पश्यामः)

(घ) .............. वस्त्रनिर्माणं भवति। (बिन्दुभिः/तन्तुभिः)

(ङ) कार्याणि .............. पूर्णानि भवन्ति (जनेन/जनैः)

(च) सीता .............. सह वनं गच्छति। (जनकेन/रामेण)

(छ) रमेशः मित्रैः .............. क्रीडति। (सः/सह)

(ज) रमा .............. सह क्रीडति। (लतया/लतायाः)

६. पाठे आगतान् तृतीयाविभक्तेः शब्दान् लिखत –

यथा - शरीरेण

७. एकतया जनाः कानि कानि कार्याणि कुर्वन्ति चिन्तयित्वा पञ्च वाक्यानि लिखत।

**योग्यताविस्तारः —**

- अधोलिखितान् श्लोकान् कण्ठस्थं कुरुत, तृतीयाविभक्तेः शब्दान् चिनुत–

(क) दानेन पाणिर्न तु कङ्कणेन, स्नानेन शुद्धिर्न तु चन्दनेन।
मानेन तृप्तिर्न तु भोजनेन, ज्ञानेन मुक्तिर्न तु मुण्डनेन।।

(ख) यथा चतुर्भिः कनकं परीक्ष्यते, निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते, त्यागेन शीलेन गुणेन कर्मणा।।